दैनिकम् ई-संस्कृतवार्तापत्रम्
# हिमसंस्कृतवार्ता

पञ्चाङ्गम्
अद्य सिद्धार्थी वि.सं. २०८२,
कलियुगाब्धः ५१२७ बसन्त-ऋतुः
सूर्यः उत्तरायणम् चैत्रकृष्णषष्ठी
फाल्गुण 25 प्रविष्टांशः मङ्गलमयः भवेत्

■ पृष्ठ-5 ■ वर्ष-5 ■ अङ्क-137 | 1 | मार्च 09, 2026 | Website- www.himsanskritam.com Email-himsanskrit@gmail.com

2 भारतं 'महिला-नेतृत्व-विकासः' इति मन्त्रेण सह अग्रे वर्धते-: राष्ट्रपतिः द्रौपदी मुर्मुः

3 मुख्यमन्त्री सुक्खूः अवदत्- तृतीयश्रेण्याः पदेषु महिलाभ्यः २५ प्रतिशतं आरक्षणं दास्यति सर्वकारः

5 "डॉ. बलदेवप्रसादचमोली-महोदयानां प्रोत्साहनेन संस्कृतं प्रति छात्राणां वर्धिता रुचिः संख्या च"

# आई सी सी टी 20 विश्वचषकः 2026 ; परिवर्तितः इतिहासः, रचितः इतिहासः, विश्वविजेता भारतम्



- **आई सी सी विंशतिः विंशतिः विश्वचषके भारतदेशः तृतीयबारं विश्वविजेता। अन्तिमक्रीड़ायां भारतेन न्यूज़ीलैंड दलं 96 धावनांकैः पराजित्य विजितं चषकम्।**
- **भारतेन तृतीयवारं विजितं विश्वचषकम्।**

हिमसंस्कृतवार्ताः- कामेश्वर शर्मा। विंशतिः विंशतिः क्रिकेट विश्वचषके 2026 अहमदाबादस्थे नरेन्द्रमोदी इति क्रीडांगणे रविवासरे भारतेन न्यूजीलैण्डदलं 96 धावनांकैः पराजितम्। अनेन विजयेन भारतं क्रमशः द्वितीयवारं विजेता अभवत्। पणकं विजित्य न्यूजीलैण्डदलेन क्षेत्ररक्षणं चयनितम्। परन्तु एषः निर्णयः न्यूज़ीलैंडदलस्य कृते सफलः नाभवत्। भारतस्य प्रारम्भः सुदृढः अभवत्। भारतीय- प्रारम्भिकक्रीडकौ अभिषेक शर्मा संजू सैमसनः च मिलित्वा सप्तकन्दुकचक्रेषु तीव्रतया 98 धावनांकाः कृताः। अभिषेक शर्मा 21 कन्दुकेषु 52, संजू सैमसन पुनरेकबारं शतकात् रहितः एव आसीत्। सः 46 कन्दुकेषु 89, ईशान किशनः 25 कंदुकेषु 54 धावनांकान् योजितवन्तः। संजू सैमसनः ईशान किशनश्च द्वितीयस्तोभाय 105 (48) धावनांकानां सहभागिताम् अकुरुताम्। मध्ये भारतस्य पक्षः किञ्चित् स्खलितः अवश्यमेव अभवत् परं तस्य अधिका हानिः नाभवत्। शिवम दुबे अन्ते त्वरया 8 कन्दुकेषु अविजितं 26 धावनांकान् अर्जितवान्। एतेषां सहयोगेन भारतेन 20 कन्दुचक्रेषु 5 स्तोभहानौ 255 धावनांकाः अर्जिताः। न्यूज़ीलैंडदलस्य कृते विजेतुं 256 धावनांकानां सुविशालं लक्ष्यं प्रदत्तम्। न्यूज़ीलैंडपक्षतः जेम्स नीशम 3, रचिन रविन्द्रः 1, मैट हैनरी च 1 स्तोभम् अर्जितवन्तः। प्रत्युत्तरे न्यूजीलैण्डदलस्य प्रारम्भः सुदृढः नाभवत्। फिन एलन 9, रचिन रवीन्द्रः 1, ग्लेन फिलिप्सश्च 5 धावनांकानामोपरि बाधिताः। प्रारम्भिकक्रीडकः टिम सीफर्ट 26 कन्दुकेषु 52 धावनांकान् अर्जितवान्। मार्क चैपमैन 03, डेरिल मिशेल 17, मिचेल सैंटनर सर्वाधिकं 43, जेम्स नीशम 08, मैट हेनरी 0, लौकी फर्ग्युसन 06, जैकब डफी च 03 धावनांकान् कृतवन्तः। अनेन न्यूजीलैण्डदलेन 19 कन्दुचक्रेषु 259 धावनांकाः एव अर्जिताः। भारतीयकन्दुकक्षेपकेषु जसप्रीत बुमराहः 04, अक्षर पटेलः 03, अभिषेकशर्मा, हार्दिकपांड्या, वरुणचक्रवर्ती च 1-1 स्तोभं ग्रहीतवन्तः। स्वकीयोत्तमप्रदर्शनाय जसप्रीत बुमराहः स्पर्धापुरुषः, संजू सैमसनः च विश्वचषकप्रतिस्पर्धायाः सर्वश्रेष्ठः क्रीडकः चयनितः। भारतीयदलनायकः सूर्यकुमार यादवः विश्वचषकम् उत्थाय अन्येषां समीपम् अनयत्। अनन्तरं सर्वे क्रीडकाः क्रीड़ाक्षेत्रे आनन्दं कृतवन्तः। सर्वे उपस्थिताः दर्शकाः चापि। सर्वे भारतीयसमर्थकाश्च स्वगृहेषु उत्सवम् अन्वभवन्।

## विश्वचषके भारतस्य यात्रा -डॉ. अमित शर्मा

| स्पर्धा | प्रतिद्वंद्वी | परिणामः |
|---|---|---|
| प्रथमा स्पर्धा | संयुक्त राज्य अमेरिका | 29 धावनांकैः विजिता। |
| द्वितीया स्पर्धा। | नाम्बीबिया | 93 धावनांकैः विजिता |
| तृतीया स्पर्धा | पाकिस्तान | 61 धावनांकैः विजिता |
| चतुर्थी स्पर्धा | नींदरलैंड | 17 धावनांकैः विजिता |
| पञ्चमी स्पर्धा | दक्षिण अफ्रीका | 76 धावनांकैः विजिता |
| षष्ठी स्पर्धा | ज़िम्बाबे | 72 धावनांकैः विजिता |
| सप्तमी स्पर्धा | वेस्टइंडीज | 05 स्तोभैः विजिता |
| अष्टमी स्पर्धा | इंग्लैंड | 07 धावनांकैः विजिता |
| नवमी स्पर्धा | न्यूज़ीलैंड | 96 धावनांकैः विजिता |

## प्रधानमन्त्रिणा सामाजिकमाध्यमेषु दत्ता शुभकामनाः

भारतीयदलेन 'टी-२०' विश्वकप-२०२६ इत्यस्य विजयश्रीः सम्प्राप्ता। अस्मिन् अवसरे सम्पूर्णं भारतं उल्लासे निमग्नम् अस्ति। भारतस्य प्रधानमन्त्री नरेन्द्रमोदी अस्मिन् उपलक्ष्ये 'टीम् इण्डिया' इति दलस्य अभिनन्दनं कृतवान्। तेन सहैव पूर्वभारतीयक्रीडकैः अपि सूर्यकुमार यादवस्य नेतृत्वे विजयिनः दलस्य प्रशंसा कृता। सचिनतेन्दुलकरतः आरभ्य विराटकोहलीपर्यन्तं सर्वे दलस्य विजयाय वर्धापनानि दत्तवन्तः।

## धनवृष्ट्या निमज्जितं भारतीयदलम्, २७.४८ कोटिरूप्यकाणां पुरस्कारः प्राप्स्यते

अहमदाबादः अन्ताराष्ट्रिय-क्रिकेट्-परिषद् (ICC) 'टी-२०' विश्वकप-स्पर्धायै आहत्य १३.५ मिलियन् (१२० कोटि-रूप्यकेभ्यः अधिकम्) पुरस्कारराशिं वितरिष्यति, या २०२४ तमवर्षस्य तुलनायां प्रायः २० प्रतिशतं अधिका अस्ति। भारत-श्रीलङ्काभ्यां कृतेन आतिथ्येन, दृढ-प्रसारण-अनुबन्धैः (Broadcasting deals) प्रायोजन-राजेन (Sponsorship) च २०२६ तमस्य टी-२० विश्वचषकपुरस्कारनिधौ वृद्धिः अभवत्।

## सुभाषितम्

**अविद्यायामन्तरे वर्तमानाः,**
**स्वयं धीराः पण्डितम्मन्यमानाः।**
**दन्द्रम्यमाणाः परियन्ति मूढा,**
**अन्धेनैव नीयमाना यथान्धाः।।**
**(कठोपनिषद् १-२/५,**

स्वयं को धीर और पण्डित मानने वाले मूर्ख लोग नाना योनियों में भटकते हुए वैसे ही ठोकरें खाते रहते हैं, जैसे अन्धे मनुष्य के द्वारा ले जाए जाने वाले अन्धे लोग।

दैनिकम् ई-संस्कृतवार्तापत्रम्
हिमसंस्कृतवार्ताः
हिमसंस्कृतवार्तापत्रस्य
एकवर्षस्य सदस्यता
१०० ₹
One year subscription to the daily
Sanskrit newspaper is Only 100 Rupees
To subscribe, text us a message
saying hello on the number below.
7876636263

सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुध्दीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति

कार्यालयः
हिमसंस्कृतम्, प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे
कस्बा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यवाहरसङ्केतः-१७७१११
सङ्केतः- प्रबन्धनिदेशिका- शिवानी शर्मा हिमसंस्कृतम्

## संजू सैमसनः प्रथमचक्रस्य 'सिक्सर-किङ्ग्' (षट्क-राजः) जातः




भारतस्य यष्टि-रक्षकः (Wicket-keeper) फलकक्रीडकः च संजू सैमसनः अहमदाबाद-नगरे न्यूजीलैण्ड्-दलेन सह जाते द्वन्द्वे ४६ कन्दुकैः ८९ धावनाङ्कान् अर्जितवान्। सः अभिषेकशर्मणा (२१ कन्दुकैः ५२ धावनाङ्काः) सह प्रथम-क्रीडाङ्गणाय (Wicket) ९८ धावनाङ्कानां सहयोगम् अकरोत्। सैमसनः स्वकीये क्रीडाक्रमे पञ्च चतुष्कान् (Fours) अष्ट षट्कान् (Sixes) च प्रहारितवान्।सः 'मेट हैनरी' इत्यनेन क्षिप्ते प्रथमचक्रे एकं षट्कं प्रहारितवान्। अनेन सह संजू सैमसनः 'टी-२०' विश्वकपे प्रथम-चक्रे-मध्ये सर्वाधिकान् षट्कान् प्रहारयिता क्रीडकः अभवत्।

## "पश्चिमबङ्गे, निर्वाचनायोगेन द्विशतं (२००) न्यायिकपदाधिकारिणां कृते आभासी-प्रशिक्षणसत्रम् आयोजितम्




पश्चिमबङ्गे निर्वाचनायोगेन ओडिशाराज्यस्य झारखण्डराज्यस्य च द्विशतं (२००) न्यायिकपदाधिकारिणाम् कृते एकं आभासी-प्रशिक्षणसत्रम् आयोजितम्। एते अधिकारिणः 'विशेष-गहन-पुनरीक्षण' (SIR) प्रक्रियायाः पर्यवेक्षणाय राज्ये समागताः सन्ति, ये विभिन्नमण्डलेषु पूर्वमेव नियुक्तेभ्यः शताधिकेभ्यः स्थानीयन्यायाधीशैः सह सम्मिलिताः भविष्यन्ति। मार्गदर्शनं प्रदातुम् कलकत्ता-उच्चन्यायालयस्य न्यायमूर्तिः अरिजीत-बन्द्योपाध्यायः पञ्जीकरण-महानिदेशकः (Registrar General) च सत्रे उपस्थितौ आस्ताम्। आयोगेन आगतानाम् अधिकारिणाम् कृते आवासस्य परिवहनस्य च रसदव्यवस्थाः अन्तिमीकृताः। अस्य पदक्षेपस्य उद्देश्यं आगामि-निर्वाचनात् पूर्वं मतदातासूच्याः परिष्करणम् अस्ति।

## अन्तर्राष्ट्रीय-महिला-दिवसस्यावसरे युवाकार्य-क्रीडामन्त्री मनसुख-माण्डविया फिट् इण्डिया पिङ्क साइक्लोथॉन' इत्यस्य हरित-सङ्केतं प्रदर्श्य प्रस्थानं कारितवान्



अन्तर्राष्ट्रीय-महिला-दिवसस्य अवसरे युवाकार्य-क्रीडामन्त्री मनसुख-माण्डविया कोलकाता-नगरे 'फिट् इण्डिया पिङ्क साइक्लोथॉन' इत्यस्य हरित-सङ्केतं प्रदर्श्य प्रस्थानं कारितवान्। श्री माण्डविया महोदयः उक्तवान् यत् ईदृशाः उपक्रमाः नागरिकेषु स्वस्थतायाः (Fitness) सामूहिक-उत्तरदायित्वस्य च संस्कृतिं वर्धयन्ति। सः जनेभ्यः द्विचक्रिकाचालनं (Cycling) स्वीकर्तुम् आग्रहं कृतवान्, यतः एषा स्वस्थ-जीवनशैलीं निर्वोढुं स्वच्छ-पर्यावरणं प्रोत्साहितुं च सरलः किन्तु प्रभावकारी उपायः अस्ति। श्री माण्डविया क्रीडासु सार्वजनिकजीवने च महिलानां महत्त्वपूर्णभूमिकायाः कृते अधिकसमर्थनस्य अवसराणां च आह्वानं कृतवान्। अस्मिन् कार्यक्रमे अर्जुनपुरस्कारविजेत्री ओलम्पिक-क्रीडिका बॉम्बेला देवी लैशराम, भारत-स्काउट्स् इत्यस्य मुख्य-आयुक्तः अविनाश कुमार गुप्तः, एवरेस्ट-पर्वतारोहिणी पियाली बसाक इत्यादयः अनेकाः प्रमुखाः विभूतयः सम्मिलिताः आसन्।

## प्रशान्तमहासागरे षट्-दशमलव-शून्य (६.०) इति रिक्टर-मापकेन तीव्रः भूकम्पः

प्रशान्तमहासागरे षट्-दशमलव-शून्य (६.०) इति रिक्टर-मापकेन तीव्रः भूकम्पः अनुभूतः। भारतस्य भूकम्पविज्ञानकेन्द्रेण सूचितं यत् भारतीयसमयानुसारं अपराह्ने २:५८ वादने पृथिव्याः सतहः १३० किलोमीटर् अन्तरे भूकम्पः जातः। विभागानुसारं इण्डोनेशिया-देशे अपि भूकम्पस्य कम्पनानि अनुभूतानि, किन्तु अद्यावधि कस्यापि जनहान्याः धनहान्याः वा किमपि वृत्तं न प्राप्तम्।

# भारतं 'महिला-नेतृत्व-विकासः' इति मन्त्रेण सह अग्रे वर्धते-: राष्ट्रपतिः द्रौपदी मुर्मुः



राष्ट्रपतिः द्रौपदी मुर्मु उक्तवती यत् भारतं 'महिला-नेतृत्व-विकासः' इति मन्त्रेण सह अग्रे सरति। नवदिल्ल्यां आयोजिते 'नारी तू नारायणी – महिला-चिन्तकानां राष्ट्रिय-सम्मेलनम्' इत्यस्य समापनसत्रे सम्बोधनं कुर्वती राष्ट्रपति-मुर्मु महोदया नारीशक्तेः प्रत्येकं पक्षम् अनुकरणीयं कर्तुम् आग्रहं कृतवती। राष्ट्रपति-मुर्मु महिलानां प्रति रूढिवादं असमानतां च दूरीकर्तुम् अपि आह्वानं कृतवती। राष्ट्रपति-मुर्मु महोदया अवदत् यत् सर्वकारः महिलानां शैक्षिक-आर्थिक-सशक्तीकरणाय अनेकानि पदानि गृह्णाति। सा समाजात् महिलानां प्रति रूढिवादं असमानतां च दूरीकर्तुम् अपि आह्वानं कृतवती। राष्ट्रपतिः उक्तवती यत् भारते महिलाः स्वरोजगारात् आरभ्य सशस्त्रबलेषु च विभिन्नक्षेत्रेषु महत्त्वपूर्णं योगदानं यच्छन्ति, क्रीडाजगति अपि नूतनान् वैश्विक-मानकान् स्थापयन्ति। सा अवदत् यत् समर्पणं, सेवा, राष्ट्रवादः, शौर्यं, धैर्यं, प्रतिभा च इत्यादिषु गुणेषु महिलाः पुरुषैः समानाः सन्ति।सा एतदपि उल्लिखितवती यत् उच्चशिक्षणसंस्थानां दीक्षान्तसमारोहेषु उत्कृष्टप्रदर्शनाय पदकं प्राप्नुवतीनां छात्राणां संख्या प्रायः छात्रेभ्यः अधिका भवति।अस्य द्विदिवसीय-सम्मेलनस्य उद्देश्यं भारते महिलानां परिवर्तमानायाः भूमिकायाः उत्सवम् आचरितुं तस्मिन् विचारं कर्तुं च आसीत्। अस्मिन् नार्याः सामाजिकभागिन्याः सकाशात् ज्ञान-नेतृत्व-करुणा-शक्ति-प्रतीकत्वं प्रति यात्रां प्रकाशितम् अस्ति।

## पश्चिम-एशिया-सङ्घर्षः-: एयर-इण्डिया-संस्थया ७८ अतरिक्त-विमानानां सञ्चालनस्य निर्णयः




पश्चिम-एशिया-सङ्घर्षस्य कारणात् विमानानां वर्धमानाम् याचनां दृष्ट्वा 'एयर-इण्डिया' इति विमानसंस्थया १० मार्चतः १८ मार्च-दिनाङ्कपर्यन्तं नव-मार्गेषु अष्टसप्ततिः (७८) अतिरिक्तानि विमानानि सञ्चालयितुं निर्णयः कृतः अस्ति। विमानसंस्थया कथितं यत् एतानि अतिरिक्तानि विमानानि देहलीतः न्यूयॉर्क्, लण्डन्, फ्रैङ्कफर्ट्, पेरिस्, एम्स्टर्डम्, ज्यूरिख्, कोलम्बो, माले च तथा मुम्बईतः लण्डन्-नगरं प्रति सञ्चालितानि भविष्यन्ति। अस्मिन् उक्तं यत् एतैः विमानैः सप्तदश-सहस्र-षट्शतानि षष्टिः (१७,६६०) अतिरिक्तानि आसनानि (Seats) योजितानि भविष्यन्ति।

## प्रधानमन्त्रिणा नवदिल्ल्यां विकासकार्याणां शिलान्यासः उद्घाटनं च कृतम्




प्रधानमन्त्री नरेन्द्रमोदी नवदिल्ल्यां विविधानां विकासकार्याणां शिलान्यासं उद्घाटनं च कृतवान्। अस्मिन् कार्यक्रमे केन्द्रीय-ऊर्जामन्त्री मनोहरलालः, दिल्ल्याः मुख्यमन्त्री रेखा गुप्ता च उपस्थिताः आसन्। स्वकीये सम्बोधने मुख्यमन्त्री रेखा गुप्ता उक्तवती यत् प्रधानमन्त्रिणा नरेन्द्रमोदिना मेट्रो-योजनायाः विविधानां वीथीनां (Corridors) लोकार्पणं शिलान्यासः च दिल्ल्याः प्रगतये नवीनां गतिं शक्तिं च प्रदास्यति। श्रीमती गुप्ता सूचितवती यत् अस्याः परियोजनायाः अन्तर्गतं विशेषतः 'पिङ्क-लाईन्' इत्यस्याः पूर्त्या सह दिल्ल्या अधुना देशस्य प्रथमं पूर्णतः सञ्चालितं 'रिंग मेट्रो' तन्त्रं (Network) प्राप्तम्।तया सहैव सा अवदत् यत् 'मजेन्टा-लाईन्' इत्यस्याः विस्तारः तथा 'फेज्-५ए' अन्तर्गतं 'सेन्ट्रल विस्टा' वीथिकायाः 'गोल्डन-लाईन्' इत्यस्याः च विस्तारः भविष्यस्य आवश्यकताः दृष्ट्वा उत्थापितं एकं दूरगामि पदम् अस्ति।श्रीमती गुप्ता अवदत् यत् मेट्रो-तन्त्रस्य एषः अभूतपूर्वः विस्तारः यातायातस्य भारं न्यूनीकरिष्यति तथा च प्रदूषणमुक्त-हरित-दिल्ल्याः सङ्कल्पं सुदृढं करिष्यति। मुख्यमन्त्री उक्तवती यत् एताः विकासपरियोजनाः नगरं एकस्याः आधुनिक-वैश्विक-राजधान्याः रूपेण स्थापयितुं मार्गं प्रशस्तं कुर्वन्ति।

## जन-औषधि-परियोजना 'विकसित-भारतस्य' निर्माणे सहायिका-: जगत-प्रकाश-नड्डा




केन्द्रीय-रसायन-उर्वरक-मन्त्री जगत-प्रकाश-नड्डा उक्तवान् यत् 'प्रधानमन्त्री-भारतीय-जन-औषधि-परियोजना' जन-औषधि-केन्द्राणां माध्यमेन स्वरोजगारस्य अवसरान् प्रदाय २०४७ पर्यन्तं 'विकसित-भारतस्य' परिकल्पनायां योगदानं ददाति। नवदिल्ल्याम् अष्टम-जन-औषधि-दिवसस्य अवसरे श्री नड्डा महोदयः एतं कार्यक्रमं सुदृढं कर्तुं बलं दत्तवान्। सः अवदत् यत् उच्च-गुणवत्तायुक्त-जेनेरिक्-औषधीनां सुनिश्चितता, जनेषु जागरूकतां वर्धयित्वा, सर्वेषु केन्द्रेषु औषधीनां निरन्तर-उपलब्धये आपूर्ति-शृङ्खलायाम् (Supply Chain) परिष्कारं कृत्वा, चालकानां कृते स्थिर-लाभांशस्य प्रतिभूतिं (Guarantee) दत्त्वा च एषा परियोजना सुदृढा कर्तुं शक्यते। अनेन देशव्यापीनां उद्यमिनां कृते एषः उपक्रमः सफलः तिष्ठेत्। श्री नड्डा महोदयः सूचितवान् यत् अष्ट-सहस्राधिकानि (८०००+) जन-औषधि-केन्द्राणि महिलाभिः सञ्चाल्यन्ते। एतत् दर्शयति यत् इयं योजना महिलाः सफलाः उद्यमिन्यः कर्तुं कथं समर्थाः अकरोत्। केन्द्रीय-रसायन-उर्वरक-राज्यमन्त्री अनुप्रिया पटेल अपि देशे महिला-उद्यमिनां सबलीकरणाय अस्याः परियोजनायाः महत्त्वपूर्णां भूमिकां प्रतिपादितवती। सा उक्तवती यत् जन-औषधि-परियोजना न केवलं सुलभानां औषधीनां प्राप्यतां सुनिश्चितं करोति, अपितु महिलानां कृते जीविकायाः मुख्यान् अवसरान् अपि सृजति।

# मुख्यमन्त्री सुक्खूः अवदत्- तृतीयश्रेण्याः पदेषु महिलाभ्यः २५ प्रतिशतं आरक्षणं दास्यति सर्वकारः




**हिमसंस्कृतवार्ताः - नाहनम् (सिरमौरः)।**

मुख्यमन्त्री सुखविन्दरसिंहसुक्खूः रविवासरे अन्ताराष्ट्रीय-महिला-दिवसस्य उपलक्ष्ये नाहन-नगरे आयोजिते राज्यस्तरीय-समारोहे अघोषयत् यत् सर्वकारीयविभागेषु तृतीयश्रेण्याः (Class-3) पदेषु महिलाभ्यः २५ प्रतिशतं आरक्षणं प्रदातुं नियमाः निर्मीयन्ते। सः आरक्षकविभागे महिला-उपनिरीक्षकाणां (Sub-Inspector) विशेषनियुक्तिं, नाहन-चिकित्सा-महाविद्यालयाय ५०० कोटि-रूप्यकाणां अनुदानं तथा महिला-सम्मान-राशिं एकलक्षतः वर्धयितुं द्विलक्ष-रूप्यकाणि कर्तुं घोषणां कृतवान्। सहैव नाहन-महाविद्यालये आगामी-सत्रात् एम.एससी. भूगर्भशास्त्र (Geology), एमबीए तथा एम.ए. इतिहास-कक्षाणाम् आरम्भस्य अपि घोषणा कृता।मुख्यमन्त्री उक्तवान् यत् वर्तमानसर्वकारस्य प्राथमिकता महिलाकल्याणम् अस्ति। सः अवदत् यत् पुत्रीभ्यः पुत्रवत् अधिकारं दत्त्वा १५० बीघा पैतृक-सम्पत्तौ तासां स्वामित्वं सुनिश्चितं कृतम्। 'इन्दिरागान्धी-सुखशिक्षा- योजनायाः' माध्यमेन विधवा-महिलानां सन्तानानां उच्चशिक्षायाः व्ययं राज्यसर्वकारः वहति। सः उदाहरणं दत्तवान् यत् अद्य लाहौल-स्पीति-जनपदस्य पूर्णं प्रशासनं महिलानां हस्ते अस्ति, सिरमौर-हमीरपुर-जनपदयोः उपायुक्ताः अपि महिला-अधिकारिणः सन्ति।

## महिला-हितार्थं प्रमुखाः निर्णयाः

१. विवाह-आयुः -कन्यानां विवाह-वयः १८ वर्षतः वर्धयितुं २१ वर्षाणि कृतम्।

२. पुनर्विवाह-प्रोत्साहनम्- विधवा-पुनर्विवाहार्थं प्रोत्साहन-राशिः ६५ सहस्रतः २ लक्ष-रूप्यकाणि कृता।

३. पुलिस-सेवा- पुलिस-नियुक्त्यां महिलाभ्यः ३० प्रतिशतं आरक्षणं पूर्वमेव दत्तम्।

४. पेंशन-योजना - आगामि-वर्षात् महिलाभ्यः १५०० रूप्यकाणां मासिक-पेंशन-विषये विचारः करिष्यते।

## आपदा-प्रबन्धनं राजनैतिक-चर्चा च

मुख्यमन्त्रिणा उक्तं यत् २०२३ वर्षस्य आपदाकाले सर्वकारेण नियमान् परिवर्तयन् प्रभावित-परिवारेभ्यः गृह-पुनर्निर्माणार्थं ७ लक्ष-रूप्यकाणां ऐतिहासिकं साहाय्यं दत्तम्। सः भाजपा-दलस्य आलोचनां कुर्वन् अवदत् यत् यदा विधानसभया विशेष-साहाय्य-प्रस्तावः आनीतः, तदा भाजपा-विधायकाः बहिर्गमनं (Walk-out) कृतवन्तः। सः १ फरवरी, २०२६ दिनाङ्कं हिमाचलस्य इतिहासस्य 'कृष्ण-दिनम्' (Black Day) इति वर्णितवान्, यतः तस्मिन् दिने केन्द्रसर्वकारेण राज्यस्य प्रतिवर्षं प्राप्यमाणा १० सहस्र-कोटि-रूप्यकाणां (RDG) साहाय्यराशिः स्थगिता। सः अवदत् यत् हिमाचलः पञ्जाबस्य क्षेत्राणि सिञ्चति, उत्तरभारतस्य कृते जलं ददाति, वनानि रक्षति, तथापि तस्य अधिकारस्य उपेक्षा कृता।

## शिक्षा-विकासः ग्रामीण-अर्थव्यवस्था च

सुक्खूः अवदत् यत् पूर्वतन-भाजपा-सर्वकारस्य काले हिमाचलं शिक्षा-गुणवत्तायां २१-तमे स्थाने गतः आसीत्। वर्तमानसर्वकारः विद्यालयेषु CBSE प्रणालीं संगीत-कला-शिक्षां च आरभते। सः ग्रामीण-अर्थव्यवस्थायाः सुदृढीकरणस्य प्रतिज्ञां कृतवान् तथा अघोषयत् यत् सर्वकारेण सप्त-गारण्टी-योजनाः पूर्णता नीताः। अङ्गनवाड़ी-कार्यकर्त्रीणां मानदेयम् अपि वर्धयितुं १०,५०० रूप्यकाणि कृतम्।

## मन्त्रिणां सम्बोधनम्

> स्वास्थ्यमन्त्री डॉ. धनीराम शाण्डिलः अवदत् यत् यत्र नारीणां सम्मानः भवति तत्र देवाः निवसन्ति। हिमाचलं देशस्य प्रथमं राज्यं यत् अनाथबालकान् 'चिल्ड्रन ऑफ द स्टेट' रूपेण स्वीकृतवान्।

> उद्योगमन्त्री हर्षवर्धन चौहानः अवदत् यत् अद्यतन-समाजस्य चिन्तने परिवर्तनम् आगतम्। सः भाजपा-दलं प्रति प्रहारं कृतवान् यत् ते आरडीजी (RDG) स्थगनस्य विरोधं न कृतवन्तः, यत् राज्यस्य अहितम् अस्ति।

> विधायकः विनयकुमारः एवं प्रदेश-कॉन्ग्रेस-अध्यक्षः अवदत् यत् पञ्चायतीराज-संस्थासु महिलाभ्यः ३३ प्रतिशतं आरक्षणं कॉन्ग्रेस-दलस्यैव दानं अस्ति।

> विधायकः अजयः सोलंकी मुख्यमन्त्रिणः स्वागतं कुर्वन् अवदत् यत् सः डॉ. यशवन्तसिंहपरमारस्य स्वप्नान् साकारं कुर्वन् ग्रामीण-हिमाचलस्य उन्नतिं करोति।अस्मिन् अवसरे विधानसभयाः पूर्व-अध्यक्षाः, पूर्व-विधायकाः, महिला-आयोगस्य अध्यक्षा विद्या नेगी, उपायुक्ता प्रियङ्का वर्मा तथा अन्ये गणमान्याः उपस्थिताः आसन्।

# हिमाचलप्रदेशीय विद्यालय-शिक्षामण्डलम्: अस्मिन् दिने यावत् आगमिष्यति दशम- तथा द्वादश- कक्षयोः परिणामः




हिमसंस्कृतवार्ताः- शिमला।हिमाचलप्रदेशीय विद्यालय-शिक्षा-मण्डलेन मार्चमासे आयोजितानां दशम- द्वादश-कक्षयोः वार्षिक- परीक्षाणाम् उत्तरपुस्तिकानां सङ्ग्रहणकार्यं परीक्षासमये एव आरभ्यते। शिक्षा-मण्डलेन ३० अप्रैल पर्यन्तं परीक्षाफलस्य घोषणायाः योजना कृताऽस्ति। १७ मार्चदिनात् उत्तरपुस्तिकापुटानां ग्रहणम्, उद्घाटनञ्च आरभ्यते। २ अप्रैल दिनात् प्रदेशे स्थापितेषु ४१ मूल्यांकनकेन्द्रेषु उत्तरपुस्तिकानां मूल्यांकनकार्यं प्रारभ्यते। शिक्षामण्डलम् एतत् सर्वम् अल्पकाले एव परीक्षाफल-घोषणायाः कृते करोति।विद्यालय- शिक्षामण्डलस्य वार्षिकपरीक्षाः ३ मार्चदिनात् आरब्धाः सन्ति। दशमकक्षायाः अन्तिमपरीक्षा २८ मार्चे भविष्यति, यदा तु द्वादशकक्षायाः परीक्षाः १ अप्रैल दिनाङ्के समाप्ताः भविष्यन्ति। प्रदेशे नियमितविद्यार्थिषु दशमकक्षायां ९३,५६४, द्वादशकक्षायां च ८१,४११ परीक्षार्थिनः पंजीकृताः सन्ति। तदतिरिक्तम् एसओएस- योजनायाः अन्तर्गतं दशमकक्षायां ३,९८४, द्वादशकक्षायां ५,४४२, अष्टमकक्षायां २१७ परीक्षार्थिनः पंजीकृताः सन्ति।

विद्यालय- शिक्षामण्डलस्य अध्यक्षः डॉ. राजेशशर्मा उक्तवान् यत् परीक्षाफलस्य कृते विद्यार्थिभ्यः दीर्घकालं प्रतीक्षा न कर्तव्या भविष्यति। शीघ्रं परिणामघोषणायाः कृते मण्डलेन पूर्वमेव योजना निर्मिता अस्ति। कस्मिन् दिने उत्तरपुस्तिकानां सङ्ग्रहणम् आरभ्यते? कस्मिन् दिने मूल्यांकनकार्यं प्रारभ्यते? कदा च परिणामः प्रकाशितः भविष्यति इति।

## "एग्जाम मित्र" अनुप्रयोगेन परीक्षायाः निरीक्षणम्

हिमाचलप्रदेशीय विद्यालय- शिक्षामण्डलस्य परीक्षाः पूर्णतया पारदर्शकाः तथा नकल-रहिताः कर्तुं मण्डलाध्यक्षः डॉ. राजेशशर्मा प्रौद्योगिक्याः उपयोगं प्रवर्तितवान्। तेन स्पष्टतया उक्तं यत् परीक्षाकेन्द्रेषु नियुक्तानां अधीक्षकस्य, उपाधीक्षकस्य च कृते मण्डलेन विकसितः "एग्जाम मित्र" नामकः अनुप्रयोगः केवलं विकल्पः न, अपि तु अनिवार्यनियमाः सन्ति। परीक्षायाः शुचितां रक्षितुम् अस्मिन् अनुप्रयोगे नियमितरूपेण अद्यतन- सूचनाः दातव्याः इति निर्देशः अपि दत्तः।मण्डलाध्यक्षः उक्तवान् यत् परीक्षाकेन्द्राणां वास्तविकस्थितेः ज्ञानार्थं त्वरितसूचना अत्यावश्यकी अस्ति। तेन अधिकारिभ्यः निर्देशः दत्तः यत् परीक्षासम्बद्धाः सर्वाः आवश्यकाः सूचनाः तथा अद्यतन-विवरणानि "एग्जाम मित्र" अनुप्रयोगे शीघ्रमेव अपलोड कर्तव्याः। अनेन न केवलं मण्डलस्य मुख्यालयाय केन्द्राणां प्रतिक्षण-स्थिति ज्ञायते, अपि तु परीक्षासमये सम्भाविताः कश्चन अनियमितताः अपि शीघ्रं ज्ञातुं शक्यन्ते।अध्यक्षः कठोरशब्दैः अधीक्षकस्य, उपाधीक्षकस्य च सावधानतां प्रदत्तवान् यत् प्रतिवेदनस्य विषये काऽपि उपेक्षा न सह्यते। अस्य डिजिटल- प्रक्रियायाः निरीक्षणार्थं केन्द्र-समन्वयकानां विशेषाधिकाराः अपि प्रदत्ताः सन्ति। एते समन्वयकाः प्रत्यक्षरूपेण पश्यन्ति यत् अनुप्रयोगे विवरणानि यथावत् तथा समये अपलोड भवन्ति वा न।

डॉ. शर्मा उक्तवान् यत् हिमाचलप्रदेशीय विद्यालय-शिक्षामण्डलम् परीक्षाः निष्पक्षतया तथा सुव्यवस्थितरूपेण सञ्चालनार्थं प्रौद्योगिकीस्य क्षेत्रे निरन्तरं विस्तारयति।

# पीटरहॉफ-अतिथिगृहे सम्मान-समारोहः सम्पन्नः मुख्यमन्त्री सुक्खूः अङ्गवस्त्रेण हिमाचली-शिरस्त्राणेन च अलङ्कृतवान्





**हिमसंस्कृतवार्ताः - शिमला।**
हिमाचलप्रदेशसर्वकारेण पीटरहॉफ-अतिथिगृहे राज्यपालस्य शिवप्रतापशुक्लस्य सम्माने एकस्य प्रस्थान-समारोहस्य आयोजनं कृतम्। अस्मिन् अवसरे लेडी गवर्नर जानकी शुक्ला अपि उपस्थिता आसीत्। मुख्यमन्त्री सुखविन्दरसिंहसुक्खूः राज्यपालं लेडी गवर्नरं च पारम्परिक-अङ्ग-वस्त्रेण, हिमाचली-शिरस्त्राणेन स्मृतिचिह्नेन च सम्मानितवान्।
समारोहं सम्बोधयन् राज्यपालः अवदत् यत् देवभूमिं हिमाचलं त्यक्त्वा नूतनदायित्वं स्वीकर्तुं गमनं तस्य कृते भावनात्मकं क्षणम् अस्ति। सः उक्तवान्, "यदा कश्चित् व्यक्तिः कस्मिंश्चित् राज्ये वा क्षेत्रे वा कार्यं करोति, तर्हि तस्मात् स्थानात् स्नेहः स्वाभाविकः अस्ति। किन्तु हिमाचलप्रदेशेन सह मम अनुभवः वास्तवतः विशेषः अभवत्।

## हिमाचलं न केवलं 'देवभूमिः', अपितु 'प्रेमभूमिः - राज्यपालः

राज्यपालः शिवप्रतापशुक्लः अकथयत् यत् हिमाचलं न केवलं 'देवभूमिः', अपितु 'प्रेमभूमिः' अपि अस्ति। अत्रत्याः जनाः सरलाः, निष्कपटाः स्नेहेन परिपूर्णाः च सन्ति।" स्वकार्यकालस्य स्नेहार्थं कृतज्ञतां प्रकटयन् राज्यपालः अवदत् यत् सः अत्रत्यानां जनानां प्रेम-सहयोगयोः स्मृतीः स्वसह नयति। सः सर्वेभ्यः राजनैतिकदलेभ्यः, सामाजिक-सांस्कृतिक-सङ्गटनेभ्यः, सर्वकारस्य अधिकारिभ्यः कर्मचारिभ्यः च प्राप्तस्य सहयोगस्य कृते सदैव ऋणी स्थास्यति।
शिवप्रतापशुक्लः अवदत् यत् हिमाचलप्रदेशः विकासमार्गे निरन्तरं अग्रेसरः अस्ति। राज्यस्य शान्तवातावरणं, समृद्धा सांस्कृतिकपरम्परा, सुदृढं सामाजिकसौहार्दं च प्रगतये प्रेरणां यच्छन्ति। सः विशेषतः शिक्षाक्षेत्रे हिमाचलस्य अद्भुतविकासस्य प्रशंसां कृतवान्। राज्यपालः नशामूलनम्, पर्यावरणसंरक्षणं, पर्यटनविकासं च प्रति विशेषध्यानं दातुं बलं दत्तवान्। सः हिमाचलवासिनां उत्तमस्वास्थ्यस्य, सुखस्य, समृद्धेः च कामनामपि अकरोत्।

**गरिमामय-व्यक्तित्वस्य प्रस्थानम् -मुख्यमन्त्री**
अस्मिन् अवसरे मुख्यमन्त्री सुखविन्दरसिंहसुक्खूः अवदत् यत् एषः क्षणः भावनाभिः पूर्णः अस्ति, यतः राज्यम् एकं गरिमामयं प्रेरणादायकं च व्यक्तित्वं विदां करोति। सः अवदत् यत् हिमाचलस्य राज्यपालत्वेन शिवप्रतापशुक्लेन स्वदायित्वाणां निर्वहणं संवेदनशीलतया समर्पणेन च सह कृतम्। तस्य आचरणं निर्णयाः च संविधानस्य भावनां गरिमां च अक्षुण्णां रक्षितवन्तः तथा अस्य संवैधानिकपदस्य प्रतिष्ठां वर्धितवन्तः।मुख्यमन्त्री उक्तवान् यत् राज्यपालस्य नेतृत्वे लोकभवनं जनसरोकारैः संबद्धं संवेदनशीलकेन्द्रम् अभवत्। सः सदैव छात्रैः, युवभिः, सामाजिकसङ्गटनैः नागरिकैः च सह नियमितरूपेण संवादं कृतवान्। विश्वविद्यालयेषु तस्य उपस्थितिः युनः ज्ञान-मूल्य-राष्ट्रसेवार्थं प्रेरितवती। सः अवदत् यत् अधुना सः तेलङ्गाणा-राज्यस्य राज्यपालत्वेन नूतनं दायित्वं स्वीकर्तुं गच्छति, अस्माकं च विश्वासः अस्ति यत् सः तत्रापि स्वानुभवेन कुशलनेतृत्वेन च सेवां करिष्यति।

**गणमान्य-जनानाम् उपस्थितिः**
अस्मात् पूर्वं मुख्यसचिवः सञ्जय गुप्तः राज्यपालस्य, मुख्यमन्त्रिणः अन्येषां च स्वागतं कृतवान् तथा गतेषु त्रिषु वर्षेषु राज्यपालस्य राज्यं प्रति महत्त्वपूर्णं योगदानं स्मृतवान्।अस्मिन् अवसरे हिमाचलप्रदेश-विधानसभायाः अध्यक्षः कुलदीपसिंहपठानिया, उप-मुख्यमन्त्री मुकेश अग्निहोत्री, मन्त्रिमण्डलस्य सदस्याः, हिमाचल-उच्चन्यायालयस्य न्यायाधीशाः, पुलिस-महानिदेशकः अशोक तिवारी, वरिष्ठाधिकारिणः च उपस्थिताः आसन्।

# नूतनराज्यपालस्य शपथग्रहणम्; केन्द्रसर्वकारेण कविन्द्रगुप्तः हिमाचलस्य राज्यपालपदे नियुक्तः



हिमाचलप्रदेशस्य नवनियुक्तः राज्यपालः कविन्द्रगुप्तः मार्च-मासस्य दशमे (१०) दिनाङ्के पदस्य गोपनीयतायाश्च शपथं ग्रहीष्यति। 'लोकभवनम्' इति स्थाने अयं समारोहः भविष्यति, यत्र हिमाचलप्रदेश-उच्चन्यायालयस्य मुख्यन्यायाधीशः तस्मै शपथं कारयिष्यति। सः हिमाचलस्य त्रिंशत्तमः (३०) राज्यपालः भविष्यति।लोकभवने शपथग्रहणसमारोहस्य सज्जताः आरब्धाः सन्ति। हिमाचलस्य नूतनराज्यपालः कविन्द्रगुप्तः सोमवासरे राजधानीं शिमलां सम्प्राप्स्यति। तस्य स्वागतार्थं सोमवासरे सायं सार्धषड्वादने (६:३०) लोकभवने कश्चित् कार्यक्रमः आयोजितः अस्ति, यस्मिन् मुख्यमन्त्री सुखविन्दरसिंहसुक्खु महोदयः, तस्य मन्त्रिमण्डलस्य सदस्याः, सेना-आरक्षकदलस्य प्रमुखाः, मुख्यसचिवः तथा च प्रशासकीय-अधिकारिणः उपस्थिताः भविष्यन्ति। एतदतिरिच्य भाजपा-नेतारः अपि स्वागतसमारोहे सम्मिलिताः भविष्यन्ति। अस्मात् पूर्वं सोमवासरे लोकभवने वर्तमानराज्यपालस्य शिवप्रतापशुक्लस्य विदाई-समारोहः (विदाई-उत्सवः) अपि आयोज्यते। उल्लेखनीयं यत् केन्द्रसर्वकारेण सद्यः एव केचन राज्यपालाः परिवर्तिताः। शिवप्रतापशुक्लः तेलङ्गाना-राज्यस्य राज्यपालत्वेन नियुक्तः, लद्दाखस्य उपराज्यपालपदात् त्यागपत्रं दत्त्वा कविन्द्रगुप्तः हिमाचलस्य नूतनराज्यपालत्वेन नियुक्तः अस्ति।

## साइबर-चौराणां नूतना रीतिः: बैंक-कर्मचारिणः भूत्वा जनान् वञ्चयन्ति

साइबर-वञ्चकाः (Cyber Thugs) आत्मानं बैंक-कर्मचारिणः इति कथयित्वा जनान् वञ्चयन्ते। एते वञ्चकाः सुलभ-ऋणस्य (Cheap Bank Loan), 'क्रेडिट्-कार्ड्' सीमावर्द्धनस्य च व्याजेन 'व्हाट्स-अैप्', सन्देशैः, दूरवाणी-कौल-माध्यमेन च जनान् प्रलोभयन्ति। एते धूर्ताः निजी-बैंकस्य कर्मचारिणः इति छद्मवेषं धृत्वा जनान् लुण्ठन्ति। साइबर-आरक्षकदलेन (Cyber Police) एतादृशेभ्यः वञ्चकेभ्यः रक्षितुं मार्गदर्शिका (Advisory) निर्गता अस्ति। हिमाचलप्रदेशे अपि सुलभ-ऋणस्य, 'क्रेडिट्-कार्ड्' सीमावर्द्धनस्य च विषये जनानां समीपे अनेके दूरवाणी-कल्स (Calls) आगच्छन्ति। साइबर-वञ्चकाः जनान् जाले पातयितुं नूतनान् मार्गान् अन्विष्यन्ति।

## पी.एम.जी.एस.वाई. (PMGSY): ग्रामीणमार्गाणां कृते अप्रैल-मासस्य १५ दिनाङ्कात् पूर्वं निविदाः (Tenders) आवश्यकाः; लोकनिर्माणविभागेन निर्दिष्टाः निर्देशाः

हिमाचलप्रदेशे 'प्रधानमन्त्री-ग्राम-सडक-योजनायाः' चतुर्थचरणे निर्मीयमाणानां ग्रामीणमार्गाणां समयसीमा (Deadline) निश्चिता कृता। लोकनिर्माणविभागेन (PWD) अप्रैल-मासस्य १५ दिनाङ्कात् पूर्वं सर्वेषां मार्गाणां निविदाः निर्गन्तुं आदेशाः दत्ताः। अप्रैल-मासतः योजनायाः चतुर्थचरणः आरप्स्यते। अतः कार्यं समये आरब्धुं शक्येत, इति विचार्य लोकनिर्माणविभागस्य प्रमुख-अभियन्तृ-कार्यालयेन एते आदेशाः निर्गताः। उल्लेखनीयं यत् अस्याः योजनायाः चतुर्थचरणे प्रदेशे २९४ मार्गाणां निर्माणं भविष्यति। एतेषु बिलासपुरे ०४, चम्बामण्डले ६५, हमीरपुरे ०२, काङ्गड़ामण्डले १२, किन्नौरे ०८, कुल्लूमण्डले ६५, लाहौल-स्पीतौ ०२, मण्ड्यां २३, शिमलामण्डले ९७, सिरमौरे ११, सोलने ०३ तथा ऊनामण्डले मार्गद्वयं (०२) निर्मीयन्ते। केन्द्रस्य ग्रामीणविकासमन्त्रालयेन मार्गनिर्माणाय २२४७.२४ कोटिरूप्यकाणां राशिः स्वीकृता, येन १५३८ किलोमीटर् दीर्घाणां मार्गाणां निर्माणं भविष्यति। अपरपक्षे, लोकनिर्माणविभागेन राज्ये 'पी.एम.जी.एस.वाई.' अन्तर्गतं नूतनमार्गाणां कृते मार्च-मासे एव निविदा-प्रक्रिया आरब्धा। प्रमुख-अभियन्तृ-कार्यालयेन मुख्य-अभियन्तारः १५ अप्रैल-पर्यन्तं एतत् कार्यं पूर्णं कर्तुं आदिष्टाः। ज्ञातमस्ति यत् अस्मिन्नेव सप्ताहे दिल्ल्यां ग्रामीणविकासमन्त्रालये एकम् उपवेशनं (Meeting) भविष्यति, यत्र मन्त्रालयेन चतुर्थचरणस्य निर्माणकार्याणां प्रतिपुष्टिः (Feedback) स्वीकरिष्यते। अतः समये निविदाः निर्गन्तुं विभागः अतीव गम्भीरतया कार्यं करोति।





# विजयनगरसाम्राज्ये स्त्रीणाम् स्थितिः

कस्यचित् राष्ट्रस्य अथवा कालखण्डस्य सामाजिकी सांस्कृतिकी च प्रगतिः यदि अस्माभिः द्रष्टव्या, तर्हि तस्मिन् काले स्त्रीणाम् अवस्था अवलोकनीया। विजयनगरसाम्राज्यस्य कालः चतुर्दशशताब्दीतः षोडशशताब्दीपर्यन्तम् आसीत्। प्रायः वर्षशतत्रयं यावत् अस्य साम्राज्यस्य वैभवशाली कालः आसीत्, यः सर्वकलानां कृते 'सुवर्णकालः' इति मन्यते।

विजयनगरसाम्राज्यस्य स्थापना १३३६ तमे वर्षे अभवत्। तद्युगस्य स्त्रियः सर्वत्र स्वकीयं वैशिष्ट्यं प्राकटयन्।

## राज्ञ्यः राजमहिलाः च

साम्राज्ये राज्ञ्याः पदं सर्वोच्चम् आसीत्। सा 'महाराज्ञी' इति उच्यते स्म। तदा राजसु बहुपत्नीत्वस्य प्रथा प्रचलिता आसीत्। राज्ञ्याः त्रयः मार्गाः आसन्। प्रथमः—यदा सा कस्यचित् सेनापतेः राज्ञः वा कन्या भवति स्म, ताः 'आर्यस्त्रियः' इति प्रसिद्धाः आसन्। यथा कृष्णदेवरायस्य द्वादश राज्ञ्यः आसन्। द्वितीयः—यदा पराजितः राजा स्वपुत्रीं विजयी-राजाय ददाति स्म। यथा—गजपतिप्रतापरुद्रः स्वपुत्रीं जगन्मोहिनीं कृष्णदेवराय दत्तवान्। सा उत्तमा संस्कृतकवयित्री समाजसेविका च आसीत्। तृतीयः—यदि राजा कांश्चित् कन्यां रोचते (पसन्द करता), तर्हि मातापितृभ्यां अनुमतिं प्राप्य तया सह विवाहं करोति स्म।

एकदा राज्ञीपदं प्राप्य तासां स्वतन्त्रतया बहिर्गमनं सीमितं भवति स्म। ताः राज्ञा सह मृगयार्थं (शिकार के लिए) गच्छन्ति स्म। यद्यपि प्रशासने तासां सहभागिता न्यूना आसीत्, तथापि धर्मकार्येषु तासां महती भूमिका आसीत्। राज्ञी चेन्नाभैरवीः एषा भारते दीर्घतमकालं यावत् शासनं कृतवती। सा 'कृष्णमरिचस्य राज्ञी' (Queen of Black Pepper) इति नाम्ना विश्वप्रसिद्धा आसीत्। तया चतुर्विंशतिवर्षाणि यावत् शासनं कृतम्। समुद्रतटस्य उपस्करव्यापारः (Spice Trade) पूर्णतः तस्याः हस्ते एव आसीत्। सा अनेकानि मन्दिराणि पुनरुद्धारितवती, साहित्याय च प्रोत्साहनं दत्तवती।

## साहित्यिकाः स्त्रियः

भारतीयदर्शनस्य अन्तिमं ध्येयं मोक्षप्राप्तिः अस्ति। ज्ञानसाधनायाः मार्गः स्त्रीणाम् अपि सुलभः आसीत्। अच्युतदेवरायस्य राजसभायां बहव्यः विदुष्यः लेखिकाः च आसन्। गङ्गादेवी, तिरुमलाम्बा इत्यादयः कवयित्र्यः अग्रगण्याः आसन्।

तस्मिन् काले महिलाः न केवलं साहित्ये, अपि तु युद्धकलायाम् अपि निपुणाः आसन्। 'हरीयाक्का' नाम्नी महिला मल्लयुद्धे अतीव कुशला आसीत्। स्त्रियः धनुर्विद्याम् अपि जानन्ति स्म। व्यापारक्षेत्रे अपि महिलानां प्राधान्यम् आसीत्। तत्कालीनः समाजः स्त्री-स्वातन्त्र्यस्य पोषकः आसीत्, येन दक्षिणभारतस्य महिलाः अद्यापि स्वावलम्बिनीः दृश्यन्ते। महिलादिनस्य उपलक्ष्ये विजयनगरसाम्राज्यस्य एतत् योगदानं चिरस्मरणीयम् अस्ति।

**डा. वर्षा प्रकाश टोणगांवकरः पुणे / महाराष्ट्रम्**



हिमसंस्कृतवार्ताः, ईदरधीरजः,हैदराबादः

# वार्तासंवादः

नन्दिनी- नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं करोमि। नमस्ते काव्ये।

काव्या- नमस्ते नन्दिनि। अद्य काः वार्ताः सन्ति?

नन्दिनी- सिंहपुर-देशे एकेन लोकयान-चालकेन साहाय्यं कृतम्। तेन साहाय्येन सा वृद्धा यानात् अवतीर्णा। एतद् दृष्ट्वा एकया महिलया चलचित्रं निर्मितम्।

काव्या- अहो, तेन चालकेन महती दया दर्शिता। कामरूप-प्रदेशे निवेदिता-नामिकया उद्यमिन्या पारम्परिक-भोजनस्य वाणिज्यम् आरब्धम्। अमुना उद्यमेन सा महत् साफल्यं प्राप्तवती अस्ति।

नन्दिनी- सत्यम्, तया स्वपरिश्रमेण उत्तमं कार्यं कृतम्। चीन-देशे एकः पुरुषः बहु-वर्षेभ्यः परं स्व-पितरौ मिलितवान् अस्ति। रक्त-परीक्षणेन तस्य कुलस्य पुनर्मेलनं कारितम्।

काव्या- अहो, एषा आश्चर्यकरी वार्ता श्रुता! बेङ्गलूरु-नगरे एकया यात्रिकया उक्तं यत् चालकेन यात्रा-समये केवलं दूरवाणी वीक्षिता। जनैः एतादृशं व्यसनं प्रदर्शितम् अस्ति।

नन्दिनी- आम्, एतत् तु चिन्तनीयम्। अस्तु, अद्यतन-वार्ताः अत्रैव समाप्ताः।

# "डॉ. बलदेवप्रसादचमोली-महोदयानां प्रोत्साहनेन संस्कृतं प्रति छात्राणां वर्धिता रुचिः संख्या च"



- **संस्कृतक्षेत्रे शैक्षिकनेतृत्वे राज्यसर्वकारेण शैलेशमटियानीपुरस्कारेण सम्मानिताः।**

कुलदीपमैन्दोला। संस्कृतसेवायै सततसंलग्नः डा. बलदेवप्रसादचमोलीवर्यः उत्तराखण्डप्रदेशस्य प्रतिष्ठितः संस्कृतविद्वान्, शिक्षाविद् तथा प्राचार्यः इति रूपेण सुप्रसिद्धः अस्ति। सः अधुना ऋषिकुलविद्यापीठब्रह्मचर्याश्रमसंस्कृतमहाविद्यालये प्राचार्यपदं वहन् संस्कृतभाषायाः संरक्षणे, संवर्धने च महत्त्वपूर्णं कार्यं कुर्वन् अस्ति। संस्कृतभाषायाः प्रचार–प्रसारार्थं तेन दीर्घकालं यावत् निष्ठया कृतं कार्यं समाजे विद्वत्सु च विशेषतया प्रशंसितम् अस्ति। तस्यैव उत्कृष्टसाहित्यिक–शैक्षिकयोगदानस्य मान्यतारूपेण तस्मै प्रतिष्ठितः शैलेशमटियानीपुरस्कारः राज्यसर्वकारेण प्रदत्तः। अनेन सम्मानेन संस्कृतक्षेत्रे कार्यरतविद्वत्सु तथा विद्यार्थिषु नूतना प्रेरणा सम्प्राप्ता।

अस्मिन् सन्दर्भे विद्यार्थिनां शिक्षकाणां च मध्ये संस्कृतविकासविषये विशेषसंवादः चमोलीवर्येण सह अभवत्। अयं साक्षात्कारः श्री नवीनपन्तवर्यस्य सौजन्येन सम्प्राप्तः। अस्मिन् अवसरे प्राचार्येण चमोलीवर्येण संस्कृतभाषायाः वर्तमानस्थितिः, तस्याः विकासस्य आवश्यकताः, छात्राणां भूमिका च विस्तरेण निरूपिता। स्ववक्तव्ये चमोलीवर्येण उक्तं यत् अद्यतनकाले अपि संस्कृतछात्राः शिक्षकाः च अनेकासु विकटपरिस्थितिषु स्थित्वापि संस्कृतहिताय समर्पितभावेन कार्यं कुर्वन्ति। संसाधनानां न्यूनतायामपि ते निरन्तरं अध्ययन–अध्यापनकार्ये संलग्नाः सन्ति। एषा निष्ठा संस्कृतभाषायाः उज्ज्वलभविष्यस्य संकेतः इति तेन प्रतिपादितम्।

**आधुनिकशिक्षया सह संस्कृतवाङ्मयस्य अध्यापनम् आवश्यकम्**

तेन अपि सूचितं यत् शासनप्रशासनस्य सहयोगेन तथा विदुषां मार्गदर्शनेन महाविद्यालयस्य सर्वाङ्गीणविकासः निरन्तरं वर्धमानः अस्ति। अधुना महाविद्यालये प्रायः २३० छात्राः अध्ययनरताः सन्ति, यत् संस्कृतभाषायाः प्रति विद्यार्थिनां वर्धमानां रुचिं स्पष्टतया दर्शयति। चमोलीवर्येण अपि प्रतिपादितं यत् आधुनिकसमये आधुनिकशिक्षणपद्धत्याः सह संस्कृतवाङ्मयस्य अध्यापनं आवश्यकम् अस्ति। परम्परागतज्ञानपरम्परायाः संरक्षणं कृत्वा तस्य आधुनिकप्रयोगेषु उपयोगः करणीयः। तेन संस्कृतभाषा न केवलं परम्परायाः प्रतीकः, अपि तु आधुनिकज्ञानस्य अपि आधाररूपेण विकसितुं शक्नोति। तथापि तेन एतदपि स्पष्टतया कथितं यत् पर्याप्तछात्रसंख्यायामपि विषयानुकूलशिक्षकाणां पूर्णोपलब्धिः अद्यापि न विद्यते। महाविद्यालयस्य समुचितविकासाय नूतनपदानां सृजनं तथा शिक्षणसंसाधनानां संवर्धनम् अत्यावश्यकम् अस्ति। यदि शासनप्रशासनं तथा समाजः सम्यक् सहयोगं करिष्यति, तर्हि संस्कृतशिक्षायाः विकासः अधिकवेगेन सम्भविष्यति।

पुरस्कारप्राप्त्याः सन्दर्भे चमोलीवर्येण राज्यसर्वकारं प्रति कृतज्ञता व्यक्ता। तेन उक्तं यत् एतत् सम्मानं केवलं तस्य व्यक्तिगतं नास्ति, अपि तु संस्कृतभाषायाः सेवायां निरताः सर्वे विद्वांसः, शिक्षकाः, छात्राः च अस्य भागिनः सन्ति। एषः पुरस्कारः संस्कृतसेवायाः प्रति समर्पितानां सर्वेषां जनानां प्रयासानां मान्यतारूपः अस्ति। एवं डा. बलदेवप्रसादचमोलीवर्यस्य नेतृत्वे महाविद्यालये संस्कृतशिक्षायाः नूतना चेतना जागृता दृश्यते। विद्यार्थिनां वर्धिता संख्या, संस्कृताध्ययने रुचिवृद्धिः, तथा शिक्षणकार्यस्य निरन्तरता — एते सर्वे तस्य नेतृत्वस्य सफलतां सूचयन्ति। तस्य कार्यं संस्कृतभाषायाः उन्नतये तथा भारतीयसंस्कृतेः संरक्षणाय महत्त्वपूर्णं योगदानं मन्यते।